# .. Ramanachatvarimshat - Forty Verses in praise of Maharshi Ramana ..

## ॥ શ્રીરમણચત્વારિંશત્ ॥

### Document Information

Text title : ramaNachatvAriMshat Forty Verses in praise of Maharshi Ramana

File name : ramaNachatvAriMshatGM.itx

Location : doc_deities_misc

Author : Vasishtha Ganapati Muni

Language : Sanskrit

Subject : philosophy/hinduism/religion

Proofread by : Sunder Hattangadi sunderh at hotmail.com

Acknowledge-Permission: Sri V.S. Ramanan, President, Sri Ramanasramam sriramanamaharshi.org

Latest update : October 1, 2014

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ શ્રીરમણચત્વારિંશત્ ॥

વન્દે શ્રીરમણર્ષેરાચાર્યસ્ય પદાબ્જમ્ ।
યો મેઽદર્શયદીશં ભાન્તં ધ્વાન્તમતીત્ય ॥

કથયા નિજયા કલુષં હરતા કરુણાનિધિનાઽરુણશૈલજુષા ।
ખગવાહનભાષિતતત્ત્વવિદા વૃષવાહનમૌનરહસ્યભૃતા ॥ ૧॥

ગણરાણ્મુખસૂરિસભાગુરુણા ગુણસઞ્ચયરત્નમહોદધિના ।
ઘનગૂઢસહસ્રકરેણ યથા તનુકઞ્ચુકગુપ્તમહામહસા ॥ ૨॥

ચતુરેણ ચલેન્દ્રિયનિગ્રહણે પટુના પરકીયગુણગ્રહણે ।
છલવર્જિતમૌનસમાધિજુષા બલતર્જિતભીકરકામરુષા ॥ ૩॥

જઠરં સમયે પરિપૂરયતા કઠિનં વ્રતમદ્રિતટે ચરતા ।
ઝષકેતનશસ્ત્રદુરાપહૃદા કૃષિમાત્મવિબોધવિધૌ દધતા ॥ ૪॥

ભવભીકરવારિનિધિં તરતા કરતામરસેન સુપાત્રવતા ।
સ્વદૃશાઽધિકશીતલકાન્તિભૃતા ભયમઙ્ઘ્રિસરોજજુષાં હરતા ॥ ૫॥

નમતામતિભક્તિમતાં નિધિના ઘનતાપવિધૂનનસન્નિધિના ।
યતિધર્મતતિં પરિપાલયતા પરિતશ્ચ તમો વિનિવારયતા ॥ ૬॥

ફણિનાયકવર્ણ્યગુણૌઘભૃતા ભણિતીઃ પ્રિયસત્યહિતા ભણતા ।
બહુમાનવશાદયતા સુખિતામવમાનતતેરવિદૂનવતા ॥ ૭॥

યતિનામધિપેન કુશાગ્રલસન્મતિના ધૃતિના શિતચિત્તભુવા ।
લહરીંપ્રમદસ્ય સદાવહતા નિહતાન્તરશાત્રવસંહતિના ॥ ૮॥

ભગવત્પદમન્યજનાસુલભં સ્વગુણૈરધિગત્ય પરં જયતા ।
મમતારહિતેન હિતેન સતાં નિહિતેન ગણપ્રભુણા હૃદયે ॥ ૯॥

ધરણીધરજાઙ્કમપિ ત્યજતા ધરણીતલવાસિતમોધુતયે ।
નરવેષભૃતા નગરન્ધ્રકૃતા રમણેન સનાથમિદં ભુવનમ્ ॥ ૧૦॥

પરદેશિનેવ ધવલેન વાસસઃ શકલેન વેષ્ટિતકટીવિશોભિના ।
વરદેશિકેન નરવેષધારિણા શિખિવાહનેન ગુરુમજ્જગદ્ભવેત્ ॥ ૧૧॥

અતીતગુણજાલાય નૈષ્ઠિકબ્રહ્મચારિણે ।
નમો માયામનુષ્યાય ગુરવે તારકારયે ॥ ૧૨॥

યાનાયાત્ર ન કેકિનાં કુલપતિઃ સ્નાનાય ન સ્વર્ણદી
પાનાય ક્ષિતિભૃન્મહેન્દ્રદુહિતુર્નસ્તન્યદુગ્ધામૃતમ્ ।

ગાનાય પ્રમથેશ્વરાસ્સવયસો નૈવાત્ર વીણાભૃતો
વાસં શોણગિરૌ કરોષિ ભગવન્ ક્રૌઞ્ચાદ્રિભેત્તઃ કુતઃ ॥ ૧૩ ॥

એકં વક્ત્રમુમાઙ્કવાસવિરહઃ પાણૌ ન શક્ત્યાયુધં
મર્ત્યત્વં ન પતાકિની ચ પૃતના પાર્શ્વદ્વયે નાકિનામ્ ।
વેષોઽલં પુનરેષ મુગ્ધનયનપ્રચ્છાદને ભૂજુષા-
મન્તર્ધાનમુપૈષિ તારકરિપો ક્વ સ્તન્યદાયાદતઃ ॥ ૧૪॥

કેચિદ્યોગવિદાં પુરઃસર ઇતિ પ્રજ્ઞાનિબુદ્ધ્યા પરે
સાધુઃ કશ્ચિદિતીતરે ગુરુધિયા કેઽપ્યઙ્ઘ્રિપદ્મં તવ ।
સેવન્તે રમણાભિધાનમનુજક્ષેમાય જાતક્ષિતૌ
દ્વિત્રાસ્ત્વાં ગિરિજાઙ્કપીઠનિલયં જાનન્તિ દેવં ગુહમ્ ॥ ૧૫॥

ઓઙ્કારાર્થમુપાદિશો ભગવતે વાણીમનોહારિણે
તાતાયાપ્યુપદેષ્ટુમુદ્યતમભૂત્ કિઞ્ચિત્ત્વદીયં મુખમ્ ।
જ્યેષ્ઠસ્યાદ્ય સહોદરસ્ય ગુરુતાં પ્રાપ્તોઽસિ ધીગૌરવાત્
સુબ્રહ્મણ્ય કનિષ્ઠતામપિ ગતઃ સર્વાધિકસ્ત્વં ગુણૈઃ ॥ ૧૬॥

યત્પૂર્વં શ્રુતિપારદર્શિધિષણો દ્વૈપાયનોઽધ્યારુહત્
પશ્ચાદ્બોધકલાવિધૂતતિમિરઃ શઙ્કાપહશ્શઙ્કરઃ ।
તત્સમ્પ્રત્યખિલાવનીતલજુષામાચાર્યસિંહાસનં
દેવ ત્વાં પ્રતિવીક્ષતે નરતનો ગીર્વાણસેનાપતે ॥ ૧૭॥

ધર્મે નાશમુપાગતે ત્રિભુવને પર્યાકુલે પાપતઃ
પ્રજ્ઞાને પરિતો ગિરાં પથિ મુધા સઞ્ચાર્યમાણે જનૈઃ ।
સદ્ભાવે પરમેશ્વરસ્ય ચ પિતુઃ સન્દેહડોલાં ગતે
દ્વીપઃ કૈતવમર્ત્યકેકિતુરગ ત્વામન્તરા કસ્સતામ્ ॥ ૧૮॥

વૈરાગ્યં તવ વિત્તમસ્તુ કરુણાં શક્નોષિ હાતું કથં
દૃશ્યસ્તેઽસ્તુ સમુદ્યમઃ પિતૃપદધ્યાનં ચ કિં તાદૃશમ્ ।
કામસ્તેઽસ્તુ વિગર્હિતો વિનમતાં રક્ષા ચ કિં ગર્હિતા
સ્કન્દચ્છન્નમનુષ્ય કિં નુ સમયં કઞ્ચિત્સમુદ્વીક્ષસે ॥ ૧૯॥

દૂરં યાહિ કુવાદ ધર્મવૃષ તે નેતઃ પરં પઙ્ગુતા
દુર્ભ્રાન્તે ભુવનં જહીહિ પરિતો વર્ધસ્વ સંસત્સતામ્ ।
સોદર્યેણ સમન્વિતો ભુવમિમાં પ્રાપ્તો ગુરુગ્રામણીઃ
શૂરાન્તઃપુરનેત્રવિભ્રમહરો દેવો ભવાનીસુતઃ ॥ ૨૦॥

જન્મસ્થાનમવાપ્ય ગુપ્તમહમો યો ભેદમાધૂતવાન્

ભૂતાનાં ચરતાં પૃથગ્વિધધિયામાત્મૈવ યો ભાસતે ।
દેહં સર્વમિદં જગચ્ચ વિભવાદાક્રમ્ય યઃ પ્રોલ્લસ-
ત્યેકસ્તં ગુરુમૂર્તિમાનમત રે લમ્બોદરભ્રાતરમ્ ॥ ૨૧॥

અન્તર્યશ્ચ બહિર્વિધૂતતિમિરં જ્યોતિર્મયં શાશ્વતં
સ્થાનં પ્રાપ્ય વિરાજતે વિનમતામજ્ઞાનમુન્મૂલયન્ ।
પશ્યન્વિશ્વમપીદમુલ્લસતિ યો વિશ્વસ્ય પારે પર-
સ્તસ્મૈ શ્રીરમણાય લોકગુરવે શોકસ્ય હન્ત્રે નમઃ ॥ ૨૨॥

પ્રસરતાદિતઃ શુભવિલોકિતમ્ ।
રમણ તે સકૃત્ફલતુ મે કૃતમ્ ॥ ૨૩॥

રમણ જન્મિનામયિ ભવાન્ ગુરુઃ ।
અભિદ આશયસ્તવ મહાનુરુઃ ॥ ૨૪॥

જગદહં પરઃ સ્ફુરતિ મે ત્રયમ્ ।
સદભિદં ગિરા તવ વિસંશયમ્ ॥ ૨૫॥

ત્વદુપદેશતો ગલતિ સંવિદા ।
મયિ નિરન્ચયા સદહમોર્ભિદા ॥ ૨૬॥

અહમિ યોઽન્તરસ્તમમલં હૃદિ ।
અનુભવેમ ભોસ્તવ કૃપા યદિ ॥ ૨૭॥

ન કરુણા ગુણસ્તવ વિદાં પતે ।
હૃદયતેજસઃ સહજભૈવતે ॥ ૨૮॥

તવ તનુર્જ્વલત્યનઘ વિદ્યુતા ।
તવ દૃગાતતા લસતિ ભાસ્વતા ॥ ૨૯॥

કબલિતં મનસ્તવ વિભો હૃદા ।
ત્વમસિ સન્તતં વિલસિતો મુદા ॥ ૩૦॥

ભુવનભૂપતેર્ભગવતઃ કૃતે ।
ભવસિ પાચકો યમવતાં પતે ॥ ૩૧॥

નરપશૂનિમાનહમિ તાડયન્ ।
પરશિવૌદનં વિતનુષે પચન્ ॥ ૩૨॥

તિમિરાણિ ન કેવલં વચોભિઃ
કરુણાપાઙ્ગવિલોકિતૈશ્ચ નૃણામ્ ।
હૃદયે પ્રસરન્તિ મર્દયન્તં
ભગવન્તં રમણં ગુરું નમામિ ॥ ૩૩॥

ભવજલનિધિં ગાહં ગાહં ચિરાદલસાલસાન્
પદજલરુહદ્વન્દ્વદ્વીપં શ્રિતાંસ્તવ સમ્પ્રતિ ।
રમણભગવન્ કલ્યાણાનાં નિકેતન પાહિ નઃ
સદય દયયા સિક્તૈર્ભક્તાનપાઙ્ગવિલોકિતૈઃ ॥ ૩૪॥

યદિ ન જનની સ્તન્યં દદ્યાચ્છિશોર્બત કા ગતિઃ
યદિ પશુપતિઃ ક્રોધં કુર્યાત્પશોરવનં કુતઃ ।
યદિ પદજુષામાચાર્ય ત્વં નિહંસિ ન સંશયં
ભ્રમશતપરાભૂતા એતે તરન્તુ ભવં કથમ્ ॥ ૩૫॥

વિશદહસિતે પૂર્ણા શાન્તિઃ સુધાકરસોદરે
સ્થિરપૃથુલયોઃ પૂર્ણા શક્તિર્દૃશોરતુલાર્ચિષોઃ ।
હૃદયકમલે નિત્યા નિષ્ઠા બહિશ્ચ સરત્પ્રભે
રમણભગવન્ કો વા મૌની સમસ્તવ ભૂતલે ॥ ૩૬॥

દેવી શક્તિરિયં દૃશોઃ શ્રિતજનધ્વાન્તક્ષયાધાયિની
દેવી શ્રીરિયમમ્બુજાક્ષમહિષી વક્ત્રો સહસ્રચ્છદે ।
દેવી બ્રહ્મવધૂરિયં વિજયતે વ્યાહારગૂઢા પરા
વિશ્વાચાર્ય મહાનુભાવ રમણ ત્વાં સ્તૌતુ કઃ પ્રાકૃતઃ ॥ ૩૭॥

સોઽહં જાતો રમણભગવન્ પાદયોસ્તે દવિષ્ઠો
યદ્યપ્યસ્મિન્મહતિ સમયે શક્તિલાસ્યે પ્રવૃત્તે ।
સૂર્યસ્યેવ જ્વલિતમહસો દૂરગાં નાથ શક્તિં
વિશ્વસ્યાગ્ર્યાં તવ મમ મનો વીતદુઃખં તથાપિ ॥ ૩૮॥

તદ્ભાગધેયમસમાનમનેકમૌનિ-
વાસાર્જિતં ક્ષિતિભૃતઃ ખલુ લોહિતસ્ય ।
અઙ્ગીચકાર ભગવાન્ રમણો મહર્ષિ-
રન્યેષુ સત્સુ યદિમં બહુષુ સ્થલેષુ ॥ ૩૯॥

શાન્તિર્નિતાન્તમધિકા પરમાસ્ય શક્તિ-
ર્વૈરાગ્યમદ્ભુતતમં કરુણા તુ સાન્દ્રા ।
જ્ઞાનં નિરસ્તકુહનં મધુરં ચ વૃત્તં
નૃણાં નિદર્શનમયં રમણો મહર્ષિઃ ॥ ૪૦॥

નારસિંહિર્ગણપતિર્વાસિષ્ઠો રમણં ગુરુમ્ ।
ચત્વારિંશન્મિતૈઃ પદ્યૈઃ સ્કન્દાંશં સ્તુતવાનૃષિમ્ ॥

Proofread by Sunder Hattangadi sunderh at hotmail.com

This work is published by Sri Ramanasramam.
It has been approved to be posted on sanskritdocuments.org
by permission of Sri V. S. Ramanan, President, Sri Ramanasramam.

.. Ramanachatvarimshat - Forty Verses in praise of Maharshi Ramana ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*